सप्तमः पाठः

D6IBM6

# सुभाषितानि

अयं निजः परो वेति गणना लघुचेतसाम्।

उदारचरितानां तु वसुधैव कुटुम्बकम्।।1।।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।

एतद् विद्यात् समासेन लक्षणं सुखदुःखयो।।2।।

वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम्।

वृथा दानं समर्थस्य वृथा दम्भो दिवापि च।।3।।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।

व्यसनेन तु मूर्खाणां निद्रया कलहेन वा।।4।।

महान्तं प्राप्य सद्बुद्धे संत्यजेन्न लघुजनम्।

यत्रास्ति सूचिकाकार्यं कृपाणः किं करिष्यति।।5।।

किं कुलेन विशालेन विद्याहीनस्य देहिनः।

विद्यावान् पूज्यते लोके नाविद्यः परिपूज्यते।।6।।

वेशेन वपुषा वाचा विद्यया विनयेन च।

वकारैः पञ्चाभिर्युक्तो नरो भवति पूजितः।।7।।

**शब्दार्थः**

**निजः** = अपना। **परः** = पराया, दूसरे का। **लघुचेतसाम्** = छोटे चित्तवालों का, अनुदार लोगों का।**वसुधैव** = (वसुधा+एव) सम्पूर्ण पृथ्वी ही। **कुटुम्बकम्** = परिवार (है)। **परवशम्** = दूसरों के वश में होना। **आत्मवशम्** = अपने अधीन। **समासेन** = संक्षेप में । **विद्यात्** = जानना चाहिए। **समर्थस्य** = भरे-पूरे, सशक्त के लिए। **दिवा**= दिन में । **धीमताम्** = बुद्धिमानों का। **व्यसनेन** = बुरी आदतों के द्वारा। **निद्रया** = सोने से। **कलहेन** = लड़ाई-झगड़ा से। **सुचिका** = सुई । **कृपाणः** = तलवार। **देहिनः** = जीव का। **अविद्यः** = विद्याहीन। **वपुषा** = शरीर से।

अभ्यासः

1. **उच्चारणं कुरुत पुस्तिकायां च लिखत-**

दुःखम्, मूर्खाणाम्, सुखदुःखयोः,

वृष्टिः , काव्यशास्त्रविनोदेन, पञ्चभिर्युक्तः,

**2. एकपदेन उत्तरत -**

(क) उदारचरितानां कृते सम्पूर्णा वसुधा किम् अस्ति ?

(ख) अयं निजः परो वेति कः गणयति ?

(ग) समुद्रेषु वृष्टिः कीदृशी भवति ?

(घ) विद्वान् कुत्र पूज्यते ?

**3. प्रश्नानामुत्तराणि लिखत -**

(क) सुखदु:खयो किं लक्षणम् अस्ति ?

(ख) पञ्चवकाराः के सन्ति ?

(ग) धीमतां कालः कथं गच्छति ?

(घ) दीपः वृथा कदा भवति ?

4. लघुचक्र मध्ये चत्वारि क्रियापदानि सन्ति। तानि द्विधा दीर्घचक्रस्थवाक्यांशैः प्रयुज्य सार्थकवाक्यानि रचयत-

**.5. मञ्जूषातः -पदानि चित्वा वाक्यानि पूरयत-**

वृथा तु गच्छति विद्यया सद्बुद्धे।

यथा- उदारचरितानाम् .......तु ............. वसुधैव कुटुम्बकम्।

(क) ..................... वृष्टिः समुद्रेषु।

(ख) महान्तं प्राप्य .....................।

(ग) मूर्खाणां समयः व्यसनेन निद्रया कलहेन .....................।

(घ) वेशेन वपुषा वाचा.................विनयेन च।

**6. विलोमपदानि योजयत -**

- निजः   निर्बलः।

सबलः     दुःखम्।

उदारः      परः।

सुखम्      अनुदारः।

**7. हिन्दीभाषायाम् अनुवादं कुरुत -**

(क) सर्वं परवशं दुःखम् सर्वमात्मवशं सुखम्।

(ख) वृथा तृप्तस्य भोजनम्।

(ग) महान्तं प्राप्य सद्बुद्ध।

(घ) विद्यावान् पूज्यते लोके नाविद्यः परिपूज्यते।

**ध्यातव्यम्** -

अस्मिन् पाठे वा, च, अपि इति, तु, एव, वृथा, सर्वत्र, वै, खलु अव्ययपदानि आगतानि सन्ति। एषां त्रिषु लिङ्गेषु त्रिषु वचनेषु सर्वासु विभक्तिषु च एकमेव रूपं भवति, अर्थात् रूप परिवर्तनं न भवति। अत एव अव्ययपदेन उच्यन्ते।

**शरीरमाद्यं खलु धर्मसाधनम्।**